CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 404

Title Rāma rakṣā stotra

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 404 Subject: Stotra

Title: Rāmarakṣā stotra

Author: — Scribe: Dave Kriṣṇa

Date of the work: — Date of the Ms.: V.S. १९२३

Place of the work: — Place of the Ms.: —

Size: 9.4" by 4.3" Extent: 5 foll

Language: Sanskrit Script: Devanāgarī

Remarks: —

॥ ॥ ॥श्रीरामचंद्रायनमः॥ ॥ ॥ॐअस्यश्रीरामरक्षास्तोत्रमंत्रस्यबुधः
कौशिकऋषिः॥श्रीरामःपरमात्मादेवता॥अनुष्टुप्छंदः॥सर्वतोस्माकंसदैव
सपरिवाराणांचोरचेटकसिंहव्याघ्रभूतप्रेतपिशाचादिभ्योसर्वबाधापरि
हरणायसकलेप्सितकामनासिद्धयेश्रीवज्रपंजरकवचजाप्येविनियोगः॥
कूजंतंरामरामेतिमधुरंमधुराक्षरं॥आरुह्यकविताशाखांवंदेवाल्मीकिको
किलं॥१॥चरितंरघुनाथस्यशतकोटिप्रविस्तरं॥एकैकमक्षरंपुंसांमहापा
तकनाशनं॥२॥ध्यात्वानीलोत्पलश्यामंरामंराजीवलोचनं॥जानकीलक्ष्म १
णोपेतंजटामुकुटमंडितं॥३॥सासितूणधनुर्बाणपाणिंनक्तंचरांतकं॥स्व

उं

लीलयाजगत्त्रातुमाविर्भूतमजंविभुं॥४॥रामरक्षांपठेत्प्राज्ञःपापघ्नींसर्वका
मदां॥शिरोमेराघवःपातुभालंदशरथात्मजः॥५॥कौशल्येयोदृशौपातुवि
श्वामित्रप्रियःश्रुती॥घ्राणंपातुमखत्रातामुखंसौमित्रिवत्सलः॥६॥जिह्वां
विद्यानिधिःपातुकंठंभरतवंदितः॥स्कंधौदिव्यायुधःपातुभुजौभग्नेशकार्मु
कः॥७॥करौसीतापतिःपातुहृदयंजामदग्न्यजित्॥मध्यंपातुखरध्वंसीना
भिंजांबवदाश्रयः॥८॥सुग्रीवेशःकटीपातुसक्थिनीहनुमत्प्रभुः॥ऊरू
रघूत्तमःपातुरक्षःकुलविनाशकृत्॥९॥जानुनीसेतुकृत्पातुजंघेदशमु
खांतकः॥पादौविभीषणश्रीदःपातुरामोखिलंवपुः॥१०॥एतांरामबलोपे

र

तां रक्षां यः सुकृती पठेत् ॥ स चिरायुः सुखी पुत्री विनयी विजयी भवेत् ॥११॥ पा
तालभूतलव्योमचारिणश्छद्मचारिणः ॥ न द्रष्टुमपि शक्तास्ते रक्षितं रा
मनामभिः ॥१२॥ रामेति रामभद्रेति रामचंद्रेति वा स्मरन् ॥ नरो न लिप्यते पा
मुक्तिं ४ पैर्भुक्तिं च विंदति ॥ जगज्जैत्रैकमंत्रेण रामनाम्नैव रक्षितं ॥ लिखित्वा धारये
द्यस्तु करस्थाः सर्वसिद्धयः ॥१४॥ वज्रपंजरनामेदं यो रामकवचं पठेत् ॥ अ
व्याहताज्ञः सर्वत्र लभते जयमंगलं ॥१५॥ आदिष्टवान् यथा स्वप्ने रामरक्षा
मिमां हरः ॥ तथा लिखितवान् प्रातः प्रबुद्धः कौशिको मुनिः ॥१६॥ तरुणौ रू २
पसंपन्नौ सुकुमारौ महाबलौ ॥ पुंडरीकविशालाक्षौ चीरकृष्णाजिनांबरौ

॥१७॥ फलमूलाशिनौ दांतौ तापसौ ब्रह्मचारिणौ ॥ पुत्रौ दशरथस्यैतौ भ्रात
रौ रामलक्ष्मणौ ॥१८॥ शरण्यौ सर्वसत्वानां श्रेष्ठौ सर्वधनुष्मतां ॥ रक्षःकुल
निहंतारौ त्रायेतां नो रघूत्तमौ ॥१९॥ संनद्धः कवची खड्गी चापबाणधरो युवा
॥ गच्छन्मनोरथोस्माकं रामः पातु सलक्ष्मणः ॥२०॥ आत्तसज्जधनुषा वि
षुस्पृशा वक्षयाशुगधरौ निषंगिणौ ॥ रक्षणाय मम रामलक्ष्मणावग्रतः प
थि सदैव गच्छतां ॥२१॥ लोकाभिरामं रणरंगधीरं राजीवनेत्रं रघुवंशवीरं ॥ का
रुण्यरूपं करुणाकरं तं वंदे सदा दाशरथिं च रामं ॥२२॥ श्रीराम राम रघुनंदन
राम राम राजीवलोचन मनोहर मानवेंद्र ॥ सौमित्रि पूर्वज समस्त जनाभि

रामदासो ह्मघन·वतःशरणागतोस्मि॥२३॥आरामःकल्पवृक्षाणांवि
रामःसकलापदां॥अभिरामस्त्रिलोकानांरामःश्रीमान्सनःप्रभुः॥२४॥
रामोदाशरथिःशूरोलक्ष्मणानुचरोबली॥काकुत्स्थःपुरुषःपूर्णःकौश
ल्येयोरघूत्तमः॥२५॥वेदांतवेद्योयज्ञेशःपुराणपुरुषोत्तमः॥जानकी
वल्लभःश्रीमानप्रमेयपराक्रमः॥२६॥इत्येतानिजपेन्नित्यंमद्भक्तःश्रद्ध
यान्वितः॥अश्वमेधादिकंपुण्यंफलमाप्नोत्यसंशयं॥२७॥आपदामपह
तारंदातारंसर्वसंपदां॥लोकाभिरामंश्रीरामंभूयोभूयोनमाम्यहं॥२८॥अ
ग्रतःश्रीनृसिंहोमेपृष्ठतोदेवकीसुतः॥उभयोःपार्श्वयोरक्षेद्भ्रातरौरामल

३

क्ष्मणौ॥२९॥अंजनीगर्भसंभूतोवायुपुत्रोमहाबलः॥लक्ष्मणप्राणदाता
चसीताशोकविनाशनः॥३०॥विशालनेत्रंपरिपूर्णगात्रंसीताकलत्रंसु
रवैरिशत्रुं॥सुग्रीवमित्रंजगतःपवित्रंश्रीरामचन्द्रंप्रणमामिनित्यं॥३१॥श्रीरा
मरामरघुनंदनरामरामश्रीरामरामभरताग्रजरामराम॥श्रीरामरामरणक
र्कशरामरामश्रीरामरामशरणंभवरामराम॥३२॥दक्षिणेलक्ष्मणोयस्य
वामेचजनकात्मजा॥पुरतोमारुतिर्यस्यतंवंदेरघुनंदनं॥३३॥जयत्यतिबलो
रामोलक्ष्मणश्चमहाबलः॥राजाजयतिसुग्रीवोराघवेणानुपालितः॥३४॥
रामरत्नमहंवंदेरघुवंशमहोदधौ॥कौशल्याशुक्तिसंजातंसीतायाःकंठभूष

णं॥३५॥मातारामोमत्पितारामचंद्रःस्वामीरामोमत्सखारामचंद्रः॥सर्वस्वंमेराम
चंद्रोदयालोनान्यंजानेनैवजानेनजाने॥३६॥रामायरामभद्रायरामचंद्रायवेध
से॥रघुनाथायनाथायसीतायाःपतयेनमः॥३७॥धन्यायोध्यादशरथनृपःसा
चमाताचधन्याधन्यावाणीकविवरमुखेरामनामप्रपन्ना॥धन्योवंशोरघुकु
लभवोयत्ररामावतारोधन्योलोकःप्रतिदिनमिदंरामवृत्तंशृणोति॥३८॥आरा
मंलक्ष्मणपूर्वजंरघुवरंसीतापतिंसुंदरंकाकुत्स्थंकरुणाकरंगुणनिधिंविप्रप्रि
यंधार्मिकं॥राजेंद्रंसत्यसंधंदशरथतनयंश्यामलंशांतमूर्तिंवंदेलोकाभि ४
रामंरघुकुलतिलकंराघवंरावणारिं॥३९॥रामोराजमणिःसदाविजयते

तं
रामंरमेशंभजेरामेणाभिहतानिशाचरचमूरामायतस्मैनमः॥रामान्नास्ति
परायणंकिमपरंरामस्यदासोस्म्यहंरामेचित्तलयःसदाभवतुमेहेराममा
मांत्यज॥४०॥मनोजवंमारुततुल्यवेगंजितेंद्रियंबुद्धिमतांवरिष्ठं॥वातात्म
जंवानरयूथमुख्यंश्रीरामदूतंशरणंप्रपद्ये॥४१॥ ॥ ॥इतिश्रीरामरक्षा
स्तोत्रंसमाप्तं॥ ॥ ॥श्री॥ ॥ ॥छ॥संवत्१९२३वर्षेपोषवदि९नामवा
सरेश्रीवत्ससुतश्रीलक्ष्मणेनलिखितं॥वा॥राश्रीपकीकाश्रीरामपठनार्थं॥
॥ ॥ ॥श्रीरस्तु॥ ॥शुभंभवतु॥ ॥कल्याणमस्तु॥ ॥ ॥श्री॥ ॥छ॥ ॥ ५